# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

**कक्षा**- शास्त्रिद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम्** - ७ (New) **गुणाः** - ७०

**विषयः** - नव्यव्याकरणम् (गौणविषयः) **कोड**- **CE - 2.3.3** **समयः** - २ तः ५

**दिनाङ्कः** - ११/१२/२०१८ **सन्दर्भग्रन्थः**- वैयाकरणसिद्धान्तकौमुदी (आत्मनेपदतः कृदन्तकृत्यप्रकरणम्)

---

**॥ प्रथमान्वितिः ॥**

**प्र-१ अधोलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या ।** १०

१. न गतिहिंसार्थेभ्यः ।

२. गन्धानावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः ।

३. दाणश्च सा चेच्चतुर्थ्यर्थे ।

**प्र-२ निम्नलिखितेषु पञ्चानां प्रयोगाणां ससूत्रं साधनिका कार्या ।** १०

१. व्यतिषते

२. गङ्गायमनामुपतिष्ठते

३. मा समृषाताम्

४. माणवकमुपनयते

५. दास्याः संयच्छते

६. आरोहन्ति हस्तिनं हस्तिपकाः

७. वादयते

८. अध्यापयति

**॥ द्वितीयान्वितिः ॥**

**प्र-३ निम्नाङ्कितेषु द्वयोः उत्तरं लिखत ।** १०

**१. धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।**
**प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥** कारिका व्याख्येया ।

२. **अभिप्रत्यतिभ्यः क्षिपः** सूत्रस्य सोदाहरणं व्याख्या विधेया ।

३. **चिण्भावकर्मणोः** सूत्रानुसारेण चिण्वद्भावस्य प्रयोजनानि वर्णयत ।

**प्र-४ निम्नलिखितेषु पञ्चानां प्रयोगाणां ससूत्रं सिद्धिः कार्या ।** १०

१. बभूवे

२. बोभूयते

३. अदायिषाताम्

४. अजा ग्रामं नयति

५. अरिता-अर्ता

६. कम्पयति

७. भोज्यते माणवकमोदनः

८. भारद्वाजीयाः पठन्ति

### ॥ तृतीयान्विति: ॥

**प्र-५ अधिलिखितेषु सूत्रेषु द्वयो: सूत्रयो: व्याख्या कार्या । १०**

१. तयोरेव कृत्यक्तखलर्था: ।

२. अग्नौ परिचाय्योपचाय्यसमूह्या: ।

३. अमावस्यदन्यतरस्याम् ।

**प्र-६ निम्नलिखितेषु प्रयोगेषु पञ्च प्रयोगा: साधनीया: । १०**

१. ग्लेयम्

२. आदृत्य:

३. रोचते रुच्य:

४. त्याज्यम्

५. वाह्यम्-वोढव्यम्

६. संभार्या:

७. पक्षे भव: पक्ष्य:

८. गम्यम्

### ॥ चतुर्थान्विति: ॥

**प्र-७ अधोलिखितेषु प्रश्नेषु दशनां प्रश्नानां लघूत्तरं लेख्यम् । १०**

१. को नाम कर्मव्यतिहार: ?

२. अनुपराभ्यां कृञ: सूत्रस्यार्थ: क: ?

३. परिव्ययेभ्य: क्रिय: सूत्रे परिव्ययेभ्य: पदे क: समास: ?

४. सकर्मकधातो: का परिभाषा ?

५. चिण्वद्भावस्य कति प्रयोजनानि सन्ति ?

६. कर्मकर्तृप्रक्रिया इत्यस्य कोऽर्थ: ?

७. के प्रत्यया: कृत्यसंज्ञका: भवन्ति ?

८. चेयम् इत्यत्र केन सूत्रेण यत् प्रत्यय: ?

९. हलन्ताच्च सूत्रे हलन्तात् पदे क: समास: ?

१०. अनुपराभ्यां कृञ: सूत्रेण किं भवति ?

११. विभाषा चिण्णमूलो: सूत्रस्यार्थ: क: ?

१२. अभिज्ञावचने पदे क: समास: ?

१३. न यदि सूत्रं कस्य सूत्रस्य बाधकसूत्रम् ?

१४. सामीप्येऽर्थे ष्यञ् प्रत्यय: केन वार्तिकेन भवति ?

१५. हेतुहेतुमतोर्लिङ् सूत्रे हेतुमत् पदे क: प्रत्यय: ?